# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - एप्रिल् २०१९

**कक्षा**-आचार्य-1(SEM-2) **प्रश्नपत्रम्** - ४ (New & Old) **गुणाः** - ७०

**विषयः** - साहित्यम् (नाट्यवर्गः) **कोड- CC- 426[4]** **समयः** - ११ तः २

**दिनाङ्कः** - १३/०४/२०१९ **सन्दर्भग्रन्थः**- नाट्यशास्त्रम् (षष्ठोऽध्यायः)

---

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः १ निम्नाङ्कितयोः कस्याप्येकस्य व्याख्यां कुरुत ।** ०५

१. आङ्गिको वाचिकश्चैव ह्याहार्यः सात्त्विकस्तथा ।
चत्वारोऽभिनया ह्येते विज्ञेया नाट्यसंश्रयाः ॥

२. चतुर्विधं च विज्ञेयमातोद्यं लक्षणान्वितम् ।
ततं तन्त्रीगतं सेयमवनद्धं तु पौष्करम् ॥

**प्रश्नः २ निम्नाङ्कितयोः कस्याप्येकस्य विशदेन उत्तरं लिखत ।** १०

१. 'अष्टौ नाट्ये रसाः स्मृताः' इति नाट्यशास्त्रम् अनुसृत्य विवृणुत ।

२. 'त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः' इति सविस्तरं यथाग्रन्थं वर्णयन्तु ।

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः ३ निम्नाङ्कितयोः कस्याप्येकस्य ससन्दर्भं व्याख्यां कुरुत ।** ०५

१. यथा बहुद्रव्ययुतैर्व्यञ्जनैर्बहुभिर्युतम् ।
आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जनाः ॥

२. न भावहीनोऽस्ति रसो न भावो रसवर्जितः ।
परस्परकृता सिद्धिस्तयोरभिनये भवेत् ॥

**प्रश्नः ४ निम्नाङ्कितयोः कस्याप्येकस्य सविस्तरम् उत्तरं लिखत ।** १०

१. साधारणी भावना च विभावादिभिरिति सोदाहरणं विवृण्वत ।

२. 'न हि रसादृते कश्चिदर्थः प्रवर्तते' इति यथाग्रन्थं व्याख्येयम् ।

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः ५ निम्नाङ्कितयोः कस्याप्येकस्य ससन्दर्भं व्याख्यां कुरुत ।** ०५

१. सुखप्रायेषु सम्पन्नः ऋतुमाल्यादिसेवकः ।
पुरुषः प्रमदायुक्तः श‍ृङ्गार इति सञ्ज्ञितः ॥

२. नानाप्रहरणमोक्षैः शिरः कबन्धभुजकर्तनैश्चैव ।
एभिश्चार्थविशेषैरस्याभिनयः प्रयोक्तव्यः ॥

**प्रश्नः ६ निम्नाङ्कितयोः कस्याप्येकस्य सविस्तरम् उत्तरं लिखत ।** **१०**

१. हास्यरसविवेचनं कुर्वन्तु ।

२. सम्भोगशृङ्गारः कैरुत्पद्यते इति विविच्य क्रोधोत्पत्तिं विवृण्वत ।

## ॥ चतुर्थान्वितिः ॥ (Unit-4)

**प्रश्नः ७ निम्नाङ्कितयोः कस्याप्येकस्य ससन्दर्भं व्याख्यां कुरुत ।** **०५**

१. यत्त्वतिशयार्थयुक्तं वाक्यं शिल्पं च कर्मरूपं वा ।
तत्सर्वमद्भुतरसे विभावरूपं हि विज्ञेयम् ॥

२. न यत्र दुःखं न सुखं न द्वेषो नापि मत्सरः ।
समः सर्वेषु भूतेषु स शान्तः प्रथितो रसः ॥

**प्रश्नः ८ निम्नाङ्कितयोः कस्याप्येकस्य विवरणं कुरुत ।** **१०**

१. शान्तवीरयोः पार्थक्यं विवृण्वत ।

२. बीभत्सं ग्रन्थानुसारं विवृण्वत ।

**प्रश्नः ९ निम्नाकिङ्कतषु दशप्रश्नानाम् अतिलघूत्तराणि यच्छत ।** **१०**

१. मुनयः भरताय कतिप्रश्नान् पप्रच्छुः?

२. शिल्पानि कति ? कानि कर्माणि?

३. अष्टौ रसाः केन प्रोक्ताः?

४. व्यभिचारिणः कति?

५. प्रथमः सात्त्विकभावः कः?

६. नाट्यसंश्रयाः अभिनयाः कति?

७. पञ्चविधानि गानानि कानि?

८. शृङ्गारस्य द्वे अधिष्ठाने के?

९. 'सन्दर्भेषु दशरूपकं श्रेयः' इति कस्य मतम्?

१०. नाट्यं सामाजिकानां हर्षैकफलं वा शोकादिफलम्?

११. शृङ्गारात् कः रसः भवेत्?

१२. शृङ्गारस्य देवता का?

१३. वृत्तयः कति?

१४. करुणस्य प्रभवस्थानं किम्?

१५. बीभत्सस्य स्थायिभावः कः?

०००